दिनाङ्क :-25.11.2025

प्रात: - 06:55

<u>प्रधानमन्त्री- अयोध्या</u>

राष्ट्रस्य सामाजिक-सांस्कृतिक-आध्यात्मिक-परिदृश्यस्य महत्त्वपूर्ण-अवसरे अद्य प्रधानमन्त्री श्रीनरेन्द्र-मोदी उत्तरप्रदेशस्य अयोध्यायाः श्रीराम-जन्मभूमि-मन्दिरस्य यात्रां करिष्यति । प्रधानमन्त्री पवित्र-श्रीरामजन्म-भूमिमन्दिरस्य शिखरे विधिवत् केशरध्वजारोहण कार्यक्रमे भागं गृहीष्यति, यद्धि, मन्दिर-निर्माणस्य परिपूर्णतायाः प्रतीकं भवति, एवं च सांस्कृतिकोत्सवस्य राष्ट्रिय-एकतायाः च नूतनस्य अध्यायस्य आरम्भं सूचयति । अस्मिन् अवसरे प्रधानमन्त्री सभाम् अपि सम्बोधयिष्यति। प्रधानमन्त्री महर्षिवशिष्ठः, महर्षिविश्वामित्रः, महर्षि-अगस्त्यः, महर्षिवाल्मीकिः, देवी अहल्या, निषादराज-गुहा, माता शबरी-सम्बद्धानाम् सप्तमन्दिराणां दर्शनमपि करिष्यति । तदनन्तरं शेषावतार-मन्दिरम्, माता-अन्नपूर्णा मन्दिरं चापि गमिष्यति । अथ रामदरबारगर्भग्रहे बालरामस्य दर्शनं पूजां च करिष्यति।

<u>प्रधानमन्त्री - कुरुक्षेत्र::</u>

गुरु तेग बहादुर-जी इत्यस्य पञ्चाशदुत्तर-त्रिशत-तम-बलिदान-दिवसस्य स्मरणार्थं विशेष-कार्यक्रमे भागं गृहीतुम् अद्य सायंकाले प्रधानमंत्री नरेन्द्र मोदी कुरुक्षेत्रं गमिष्यति । कार्यक्रमस्य अवसरे श्री मोदी पूज्यगुरु-तेग-बहादूरस्य बलिदानदिवसस्य स्मारक-रूपेण विशेष-मुद्रां स्मारकमुद्रां च विमोचयिष्यति । यात्राकाले प्रधानमन्त्री श्रीकृष्णस्य पवित्रशङ्खस्य सम्मानार्थं परिकल्पितस्य नवनिर्मितस्य भवनस्य पाञ्चजन्यस्य अपि उद्घाटनं करिष्यति । पश्चात् सायंकाले श्रीमद्भगवद्गीतायाः दिव्यप्रकाशनेन सह सम्बद्धस्य, देशस्य पवित्रतमेषु तीर्थस्थलेषु अन्यतमस्य ब्रह्मसरोवरस्य दर्शनं पूजां च करिष्यति । प्रचलित-अन्ताराष्ट्रिय-गीतामहोत्सवस्य अवसरे इयं यात्रा महत्त्वपूर्णा वर्तते ।

प्रधानमन्त्री श्रमपत्रम्

उद्योगसंस्थानां संघेन चतुर्णां श्रमसंहितानां प्रशंसाम् कुर्वता प्रधानमन्त्री नरेन्द्रमोदिने पत्रं लिखितम् । संस्थायाः राष्ट्रियाध्यक्षः एस.के.शर्मा इत्यनेन उक्तं यत्, अयम् अद्भुतः निर्णयः वर्तते । सः उक्तवान् यत्, एताः श्रमसंहिताः आधुनिकीं, पारदर्शिकीं, समानां च श्रमरूपरेखायाः निर्माणाय सर्वकारस्य दूरदर्शी-प्रतिबद्धतां प्रतिबिम्बयन्ति। एयर इण्डिया एयरक्राफ्ट इन्जिनियर्स एसोसिएशन, दिल्ली इत्यस्य महासचिवः एस.एन. भट्टः देशे चतुर्णां श्रमसंहितानां कार्यान्वयनस्य स्वागतं कृतवान् ।

ईसीएसआईआर-

निर्वाचन-आयोगेन उक्तं यत् एसआईआर इत्यस्य विशेष-सघन-पुनरीक्षणस्य द्वितीयचरणस्य आरम्भात् आरभ्य अधुना यावत् मतदातृभ्यः ऊनशतम् प्रतिशताधिक-गणना-प्रपत्राणि वितरितानि सन्ति। आयोगेन उक्तं यत् एतावता पञ्चाशत् लक्षाधिक - पञ्चाशत् कोटि गणना-प्रपत्राणि वितरितानि सन्ति ।

भारतं अफगानिस्तान-

वस्त्र-क्षेत्रे द्विपक्षीयसहकार्यस्य विस्तारस्य सम्भावनाः अन्वेष्टुं ह्यः नवदिल्लीनगरे उच्चस्तरीयः अफगानिस्तान-प्रतिनिधिमण्डलेन वस्त्र-मन्त्रालयस्य अधिकारिभिः सह मिलित्वा संगोष्ठी कृता । आर्थिक-सम्बन्धस्य महा-निदेशकस्य शफी-उल्लाह आजमस्य नेतृत्वे अनेन प्रतिनिधिमण्डलेन - भारतसर्वकारस्य व्यापार-परामर्षदेन ए.बिपिन् मेनन् इत्यनेन सह चर्चा कृता । अफगानिस्तानस्य वस्त्रपारिस्थितिकीतन्त्रस्य सुदृढीकरणं, उद्योगावसराणां सृजनं, कार्पास-वस्त्रस्य च मूल्य-शृङ्खलायां प्रवेशं कुर्वतां कृषकाणां प्रशिक्षण-सुविधासु परिवर्तनं च इति विषये चर्चाः केन्द्रीकृताः आसन् ।

ढाकानगरे विश्वकपः

ढाकानगरे कबड्डी-विश्वचषकक्रीडायां, अन्तिमचक्रे, भारतीय-महिला-कबड्डी दलेन चीनदेशस्य-कबड्डीदलं विरुद्ध्य, पञ्चत्रिंशत् - अष्टाविंशतिः इत्यंक-अन्तरालेन प्रबल-वियजः सम्प्राप्तः। अनेन भारतेन, सततम् द्वितीयवारं विश्वमहिला-कबड्डी-चषकः स्वायत्तीकृतः। केन्द्रीयगृहमन्त्री श्री-अमितशाहः ऐषमः कबड्डी विश्वचषक-विजेत्रे भारतीय-महिला दलाय अभिनन्दनानि प्रदत्तानि । एकस्मिन् सामाजिक-सन्देशे श्रीशाहः अवदत् यत् एषः ऐतिहासिकः क्षणः भारतस्य कृते गर्वस्य विषयः वर्तते ।

।।इति वार्ता:।।